# उपनिषद्

**Presented by**
Achyuta Adhikari
SACT-II
Department of Sanskrit
Saltora Netaji Centenary College
Saltora, Bankura, 722158.
E-mail: achyutaadhikary00538@gmail.com

# उपनिषद्

उपनिषद् पराविद्या इति पदेन व्यपदिश्यते । वेदान्तिभिः उपनिषद् इत्य आख्यायते । उपनिषच्छब्दस्य रहस्यमर्थः, अध्यात्मविद्यारहस्यप्रतिपादकाः वेदभागाः उपनिषदः कथ्यन्ते । तासु महर्षयः आध्यात्मिक्या विद्यया गूढतमानां रहस्याणां विशदतया विचारं कुर्वाणाः प्राप्यन्ते । भारतीयदर्शनसाहित्ये सन्ति त्रयः। प्रस्थानग्रन्थाः । ते वेदान अवलम्बमानाः मानवजीवनस्य चरम लक्ष्यं तत्प्राप्तिसाधनञ्च उपदिशन्ति । भारतीयविचारशास्त्रस्य श्रेष्ठोपजीव्यग्रन्थत्वादुपनिषदः प्रस्थानत्रय्या प्रथमप्रस्थानत्वेन गृह्यन्ते। श्रीमद्भगवद्गीता द्वितीयं प्रस्थानमिति। गीतायाः द्वितीयप्रस्थानत्वम् तस्यामेव प्रकटितम् अस्ति। यथा -

# विषयवस्तु

- उपनिषत्सु अद्वैतविशिष्टाद्वैतश्रुतीनां सद्भावो भाति । अ◌ाचार्यैः स्वसिद्धान्तप्रतिष्ठापिकाः श्रुतयः प्रधानत्वेन स्वीकृताः, अन्यासां श्रुतीनां गौणत्वञ्च तैरुपपादितम्। शङ्करः स्वभाष्येण अद्वैतं, श्रीरामानुजाचार्यानुगा विशिष्टाद्वैतं तत्र प्रतिपादयन्ति । वस्तुतः उपनिषत्सु दर्शनानां सर्वेषामपि बीजानि निहितानि सन्ति । न केवलम् आस्तिकदर्शनानामपि तु नास्तिकदर्शनानामपि मूलसिद्धान्ताः समुपलभ्यन्ते ।

# अनुवादाः

- सप्तदशशतके दाराशिकोहनामा शाहजहाँ-नाम्नः सम्राजः पुत्रः ५० संख्याकाः उपनिषदः पारसीभाषायां ब्राह्मणपण्डितानां साहाय्येनानूदितवान् । शोपेन हावेर( Shopen Howers )-नामा प्रसिद्धो वैदेशिको दार्शनिक उपनिषदः स्वगुरुषु गणयति स्म ।

# सङ्ख्या

- सर्वोपनिषदां मध्ये सारमष्टोत्तरं शतम्' इत्येतत् मुक्तिकोपनिषद्वाक्येन उपनिषदष्टोत्तरशततोऽप्यधिकाः अ◌ासन् इति ज्ञायते। प्राप्तासु अष्टोत्तरशतसंख्याकासु उपनिषत्सु प्रायेण द्वादश उपनिषदः प्राचीनत्वाद् विशदतया च विषयस्य प्रतिपादकत्वाद् अतितरां प्रामाणिकाः मताः भवन्ति । तत्र १० उपनिषदः ऋग्वेदसम्बद्धाः, १९ उपनिषदः शुक्लयजुर्वेदसम्बद्धाः, ३२ कृष्णयजुर्वेदसम्बद्धाः, १६ सामवेदसम्बद्धाः, ३१ अथर्ववेदसम्बद्धाः । वेदान्ताचार्या एतासु उपनिषत्सु कतिचनोपनिषदः स्वमतानुसारिण्यया व्याख्यया भूषितवन्तः । तासु दशोपनिषदः प्रसिद्धाः।

# उपनिषदां भाषान्तरेष्वनुवादः

- शाहजहाँसुतस्य दाराशिकोहस्य उपनिषत्प्रेम जगति विदितमेव। १६५७ ख्रीष्टाब्दे दिल्लीनगरस्य निगमबोधनामकस्थाने षण्मासाभ्यन्तर एव अश्रान्तपरिश्रमेण अयं पञ्चाशद् उपनिषदा् अनुवादं संस्कृतपण्डितानां साहाय्येन कारितवान् ।

धन्यवाद